# vainAyaka trishati

# વૈનાયક ત્રિશતિ

## Document Information

Text title : Vainayaka Trishati

File name : vainAyakatrishati.itx

Category : ganesha, trishati, shati

Location : doc_ganesha

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran, Aruna Narayanan

Description-comments : See corresponding nAmAvalI

Latest update : June 1, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 1, 2023

*sanskritdocuments.org*

# વૈનાયક ત્રિશતિ

॥ શ્રીગણેશનામત્રિશતીસ્તોત્રમ્ ॥

॥ ૐ ગં ગણપતયે નમઃ ॥

સૂર્ય ઉવાચ —
એકાર્ણમન્ત્રવત્સર્વં ઋષ્યાદિકમુદીરિતમ્ ।
છન્દોઽનુષ્ટુપ્ કીર્તિતં ચ સ્વાનન્દેશસ્તુ દેવતા ॥ ૧॥

ગણેશ્વરો ગણક્રીડો ગણનાથો ગણાધિપઃ ।
ગજાનનો ગણપતિર્નિત્યાનિત્યો નિરામયઃ ॥ ૨॥

નિર્મલો નિષ્કલો નિત્યો નાદમધ્યે પ્રતિષ્ઠિતઃ ।
નિધિર્નિધિપ્રિયપતિર્નાદાતીતો નિધિપ્રદઃ ॥ ૩॥

નદીનદભુજો નાદજનકો વિઘ્નનાયકઃ ।
વિનાયકો વિરૂપાક્ષો વરદો વિશ્વપાલકઃ ॥ ૪॥

વિઘ્નકૃન્નિઘ્નચરણો ગજદન્તો ગજધ્વનિઃ ।
ગણરાજો ગણશ્રીદો ગણપૂજ્યો ગણેષ્ટદઃ ॥ ૫॥

નાગાનનો નિમ્નનાભિર્નિત્યાનન્દો નિરઙ્કુશઃ ।
નલિનીકામુકો નિત્યં નિત્યાનિત્યાવતંસિતઃ ॥ ૬॥

પૂર્ણાનન્દઃ પરન્ધામ પરમાત્મા પરાત્પરઃ ।
પરં પદં પશુપતિસ્તત્ત્વં પદનિરૂપિતઃ ॥ ૭॥

તત્ત્વાનાં પરમં તત્ત્વં તારકસ્તારકાન્તકઃ ।
તારકાન્તરસંસ્થાનસ્તારકાન્તકપૂર્વજઃ ॥ ૮॥

હિરણ્મયપુરાન્તસ્થો હૃદયાલાનનિશ્ચલઃ ।
હૃત્પદ્મકર્ણિકાશાલિવિયત્કેલિસરોવરઃ ॥ ૯॥

હેરમ્બો હવનો હવ્યો વિધાતા વિશ્વતોમુખઃ ।

વિકર્તા વિશ્વતશ્ચક્ષુર્વન્ધ્યો વેદાન્તગોચરઃ ॥ ૧૦॥

મદોત્કટો મયૂરેશો મોહિનીશો મહાબલઃ ।
મહાગણપતિર્મેઘનાદો હૃત્પદ્મસંસ્થિતઃ ॥ ૧૧॥

હંસો હસ્તિપિશાચીશો હૃલ્લેખામન્ત્રમધ્યગઃ ।
હર્ષો હવ્યકવ્યભુક્ચ કપર્દી કલભાનનઃ ॥ ૧૨॥

કર્મસાક્ષી કર્મકર્તા કલ્પઃ કર્માગ્રપૂજિતઃ ।
વક્રતુણ્ડો વિઘ્નરાજો વિદ્યાદો વિજયસ્થિરઃ ॥ ૧૩॥

વિશ્વકર્તા વિશ્વમુખઃ કામદાતા કટઙ્કટઃ ।
કલ્પકઃ કુમારગુરુઃ કિરીટી કુલપાલનઃ ॥ ૧૪॥

વૈમુખ્યહતદૈત્યશ્રીર્વરાહરદનો વશી ।
વાગીશ્વરીપતિર્વાચા સિદ્ધો વાયુસુકીલકઃ ॥ ૧૫॥

નન્દિપ્રિયો નગસુતાનન્દનો નિજસંસ્થિતઃ ।
નષ્ટદ્રવ્યપ્રદો નાદો નારાયણસુપૂજિતઃ ॥ ૧૬॥

ઉચ્છિષ્ટગણ ઉચ્છિષ્ટઃ ઉચ્છિષ્ટગણનાયકઃ ।
ઉપેન્દ્ર ઉડુભૃન્મૌલિરુદારત્રિદશાગ્રણીઃ ॥ ૧૭॥

પદ્મપ્રસન્નનયનઃ પ્રણતાજ્ઞાનમોચનઃ ।
પ્રત્યૂહાજ્ઞાનવિજ્ઞાનઃ પ્રત્યૂહહિમહવ્યભુક્ ॥ ૧૮॥

પ્રત્યૂહામ્ભોધિકાલાગ્નિઃ પ્રત્યૂહગરલામૃતઃ ।
મૃત્યુઞ્જયો મુક્તિદાતા મહાનાદો મદોત્કટઃ ॥ ૧૯॥

મદનાવત્યાશ્રિતાઙ્ઘ્રિર્મુદ્ગરાયુધધારકઃ ।
શાકલશ્શમ્ભુતનયઃ શક્તિજશ્શમ્ભુહાસ્યભૂઃ ॥ ૨૦॥

શિવાસુખાવહશ્શમ્ભુતેજોભૂશ્શમ્ભુકોપહા ।
વાણીજિહ્વો વ્યોમનાભિઃ વાગ્મી વાસવનાસિકઃ ॥ ૨૧॥

વૈનાયકીસહચરો વિધૃતાલિસમૂહકઃ ।
સ્તવસ્સ્તુતિપરસ્સ્તવ્યસ્સ્તુતિતુષ્ટસ્સ્તુતિપ્રિયઃ ॥ ૨૨॥

મહાલક્ષ્મીપ્રિયતમો માતુલિઙ્ગધરો મહાન્ ।
મદનાવત્યાશ્રિતાઙ્ઘ્રિર્મહાબુદ્ધિમનોરમઃ ॥ ૨૩॥

મોહિનીમોહનો જ્યેષ્ઠો જ્યેષ્ઠરાજો જગન્મયઃ ।
જ્યેષ્ઠપૂજિતો જ્યેષ્ઠેશો જ્યેષ્ઠરાજપદે સ્થિતઃ ॥ ૨૪॥

ષડક્ષરષ્ષડાધારષ્ષટ્ચક્રોપરિ સંસ્થિતઃ ।
ષડૃતુકુસુમસ્રગ્વી ષણ્મુખષ્ષણ્મુખાગ્રજઃ ॥ ૨૫॥

રૌદ્રીમુદ્રિતપાદાબ્જો રુષ્ટચિત્તપ્રસાદનઃ ।
રુદ્રપ્રિયો રુદ્રપત્નીપુત્રો રુદ્રશિરોધરઃ ॥ ૨૬॥

રત્નમણ્ડપમધ્યસ્થો જપપૂજનતોષિતઃ ।
જપ્યો જપો જપપરો જિહ્વાસિંહાસનપ્રભુઃ ॥ ૨૭॥

જિતેન્દ્રિયેષ્ટસન્દાતા બ્રહ્મેશો બ્રહ્મણસ્પતિઃ ।
બ્રહ્માણ્ડકુમ્ભો બ્રહ્મસ્થો બ્રહ્મચારી બૃહસ્પતિઃ ॥ ૨૮॥

હંસો હરો હસ્તિપતિઃ હર્ષદો હવ્યકવ્યભુક્ ।
હાદિવિદ્યાશક્તિપતિર્હૃલ્લેખામન્ત્રમધ્યગઃ ॥ ૨૯॥

નામપારાયણપ્રીતો નામનિષ્ઠવરપ્રદઃ ।
નાર્મદાર્ચનસન્તુષ્ટો નાગેન્દ્રતનયો નટઃ ॥ ૩૦॥

નિજાનન્દસન્નિષણ્ણો બાલકેલિકુતૂહલી ।
બ્રહ્મમૂર્દ્ધા બ્રહ્મમુખો બ્રહ્માણ્ડાવલિમેખલઃ ॥ ૩૧॥

બૃહદારણ્યસંવેદ્યો બ્રહ્મણાં બ્રહ્મણસ્પતિઃ ।
મયૂરનાયકો માયાપતિર્મૂષકવાહનઃ ॥ ૩૨॥

મન્દારપૂજનપ્રીતો મન્દારકુસુમપ્રિયઃ ।
મન્દારમૂલસઞ્જાતો નાગભૂષણભૂષિતઃ ॥ ૩૩॥

નાગહારકટીસૂત્રો નાગયજ્ઞોપવીતવાન્ ।
નાગરાજયોગદાતા નાગકન્યાસુશાન્તિદઃ ॥ ૩૪॥

નારાયણાર્ચિતપદઃ સંયોગાનન્દવિગ્રહઃ ।
સૃષ્ટિસ્થિતિલયક્રીડસ્સર્વભેષજભેષજમ્ ॥ ૩૫॥

સિન્દૂરિતમહાકુમ્ભસ્સામગાનરતસ્સુખી ।
તત્પદસ્તત્પદારાધ્યસ્તત્પદાર્થસ્વરૂપવાન્ ॥ ૩૬॥

તત્ત્વમસ્યાકૃતિધરસ્તત્ત્વમસ્યર્થવિગ્રહઃ ।
તત્ત્વમસ્યર્થસંવેદ્યો હ્યાનન્દમૂર્તિધારકઃ ॥ ૩૭॥

આધારપીઠ આમોદ આશ્રિતાભીષ્ટદાયકઃ ।
આદિમધ્યાન્તરહિતઃ આખુરાજમહારથઃ ॥ ૩૮॥

નિજભક્તપ્રિયતમો નરનારાયણાર્ચિતઃ ।
નારાયણશ્રી પૂર્વાઙ્ગો નટરાજસુપૂજિતઃ ॥ ૩૯॥

નિરાલમ્બયોગગમ્યો નિદિધ્યાસવરપ્રિયઃ ।
શ્રીઙ્કારશક્તિસંયુક્તઃ શ્રીપતિર્શ્રીનિકેતનઃ ॥ ૪૦॥

શ્રીઙ્કારવિગ્રહશ્શ્રીદશ્શ્રીસિદ્ધિબુદ્ધિવિનાયકઃ ।
વિરાડ્ વિશ્વો વેદપતિર્વેદકર્તા વિરાટ્ સુતઃ ॥ ૪૧॥

વિરાટ્પતિરૂર્ધ્વલોકગત ઊર્ધ્વવિનાયકઃ ।
ઊર્જસ્વાનૂષ્મલમદ ઊહાપોહદુરાસદઃ ॥ ૪૨॥

ઊનષોડશવર્ષાઢ્યસ્તિર્યગ્ગતિવિનાશકઃ ।
તિથિમાત્રસુસમ્પૂજ્યસ્સ્થિતિમાત્રવરપ્રદઃ ॥ ૪૩॥

તત્ત્વેષ્ટદસ્તત્ત્વપતિસ્તત્ત્વાતત્ત્વવિવેકદઃ ।
ભીમરૂપો ભૂતપતિર્ભૂપતિર્ભુવનેશ્વરઃ ॥ ૪૪॥

ભ્રૂક્ષેપદત્તલક્ષ્મીકો ભૂતિદસ્સોમભૂષણઃ ।
સ્વતન્ત્રસ્સત્યસઙ્કલ્પસ્સત્યસઙ્કલ્પદાયકઃ ॥ ૪૫॥

સ્વસંવેદ્યશ્ચ સર્વજ્ઞો દણ્ડભૃદ્દણ્ડનાયકઃ ।
દક્ષયજ્ઞપ્રમથનો દયાવાન્ દૈત્યમોહનઃ ॥ ૪૬॥

દિવ્યવૈભવસન્દાતાઽસુરકુઞ્જરભેદનઃ ।
સાક્ષી સમુદ્રમથનસ્સદસદ્વ્યક્તિદાયકઃ ॥ ૪૭॥

સ્વસંવેદ્યાસમ્પ્રજ્ઞાતયોગગમ્યસ્વદક્ષિણઃ ।
દન્તપ્રભિન્નાભ્રમાલો દેવાર્થનૃગજાકૃતિઃ ॥ ૪૮॥

દંષ્ટ્રાલગ્નદ્વિપઘટો દૈત્યવારણદારણઃ ।
દુરાસદગર્વહરો દિવોદાસવરપ્રદઃ ॥ ૪૯॥

નેતિકર્તા નેતિપદો નેતિબ્રહ્મવરપ્રદઃ ।
નેતિસ્વાનન્દપદદો નેતિશક્તિસમન્વિતઃ ॥ ૫૦॥

નેત્યસમ્પ્રજ્ઞાતમયયોગલભ્યસુવિગ્રહઃ ।

ઓઙ્કારશક્તિસહિતઃ ઓઙ્કારમુખરાજિતઃ ॥ ૫૧॥

ઓઙ્કારવાચ્ય ઓઙ્કાર ઓઙ્કારપૂર્ણવિગ્રહઃ ।
ઓઙ્કારમયવિશ્વાત્મા ગઙ્કારમન્ત્રવિગ્રહઃ ॥ ૫૨॥

ગઙ્કારજપસન્તુષ્ટો ગઙ્કારભૂમરૂપવાન્ ।
ગઙ્કારો ગમ્મન્ત્રવેદ્યો ગમ્બ્રહ્મસ્થિતિદાયકઃ ॥ ૫૩॥

ઇદં વૈનાયકં નામ્નાં ત્રિશતિ શ્રુતિકીર્તિતમ્ ।
ઋઙ્મન્ત્રસમ્ભવં વેદસારં ગણકકીર્તિતમ્ ॥ ૫૪॥

ઇદં બ્રાહ્મે મુહૂર્તે વા જપાન્તે દેવસન્નિધૌ ।
પ્રાતર્મધ્યન્દિને સાયં પૂજાન્તે વાઽથ યઃ પઠેત્ ॥ ૫૫॥

ધનધાન્યં પશૂન્ પુત્રાન્ રૂપં વિદ્યાં બલં શ્રિયમ્ ।
આરોગ્યં ધર્મમર્થં ચ કામં મોક્ષમવાપ્નુયાત્ ॥ ૫૬॥

અયુતાવર્તનાદસ્ય ભવેત્સિદ્ધિર્નિરન્તરમ્ ।
એકાક્ષરં સમુચ્ચાર્ય ચતુર્થ્યન્તં તુ નામ વૈ ॥ ૫૭॥

સ્વાહાપદં સમુચ્ચાર્ય હોમઃ કાર્યો વિધાનતઃ ।
દ્વિતીયાન્તં તર્પણં તુ તર્પયામીતિ શબ્દતઃ ॥ ૫૮॥

તથૈવ માર્જનં કાર્યં માર્જયામીતિ તત્પરમ્ ।
પુરશ્ચર્યાં નરઃ કૃત્વા ભુક્તિં મુક્તિમવાપ્નુયાત્ ॥ ૫૯॥

(વિનાયકરહસ્યે)

ઇતિ વિનાયકરહસ્યે ગ્રન્થે જ્ઞાનસારં પ્રથમભાગે
નારદાદિ મુનીનાં સૂર્યભગવતા પ્રોક્તા
ત્રયોદશાધ્યાયાન્તર્ગતા વૈનાયક ત્રિશતિ સમાપ્તા ।

Narrated by Soorya Bhagavaan to Naarada and other Rishis.
Contained in Chapter 13 of Part-1 of JnaanasaaraM in the
book Vinaayakarahasyam

Encoded by PSA Easwaran
Proofread by PSA Easwaran, Aruna Narayanan

*vainAyaka trishati*

pdf was typeset on June 1, 2023

Please send corrections to *sanskrit@cheerful.com*